# Purvadinacharya

# પૂર્વદિનચર્યા

## Document Information

Text title : Purvadinacharya

File name : pUrvadinacharyA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# પૂર્વદિનચર્યા

શ્રીદેવરાજગુરુભિરનુગૃહીતા
શ્રીરસ્તુ ।
શ્રીમતે હયગ્રીવાય નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ॥

સૌમ્યજામાતૃયોગીન્દ્રચરણામ્બુજષટ્પદમ્ ।
દેવરાજગુરું વન્દે દિવ્યજ્ઞાનપ્રદં શુભમ્ ॥

અઙ્કે કવેરકન્યાયાસ્તુઙ્ગે ભુવનમઙ્ગલે ।
રઙ્ગે ધામ્નિ સુખાસીનં વન્દે વરવરં મુનિમ્ ॥ ૧॥

મયિ પ્રવિશતિ શ્રીમન્મન્દિરં રઙ્ગશાયિનઃ ।
પત્યુઃ પદામ્બુજં દ્રષ્ટુમાયાન્તમવિદૂરતઃ ॥ ૨॥

સુધાનિધિમિવ સ્વૈરસ્વીકૃતોદગ્રવિગ્રહમ્ ।
પ્રસન્નાર્કપ્રતીકાશપ્રકાશપરિવેષ્ટિતમ્ ॥ ૩॥

પાર્શ્વતઃ પાણિપદ્માભ્યાં પરિગૃહ્ય ભવત્પ્રિયૌ ।
વિન્યસ્યન્તં શનૈરઙ્ઘ્રી મૃદુલૌ મેદિનીતલે ॥ ૪॥

આમ્લાનકોમલાકારમાતામ્રવિમલામ્બરમ્ ।
આપીનવિપુલોરસ્કમાજાનુભુજભૂષણમ્ ॥ ૫॥

મૃણાલતન્તુસન્તાનસંસ્થાનધવલત્વિષા ।
શોભિતં યજ્ઞસૂત્રેણ નાભિબિમ્બસનાભિના ॥ ૬॥

અમ્ભોજબીજમાલાભિરભિજાતભુજાન્તરમ્ ।
ઊર્ધ્વપુણ્ડ્રૈરુપશ્લિષ્ટમુચિતસ્થાનલક્ષણૈઃ ॥ ૭॥

કાશ્મીરકેસરસ્તોમકડારસ્નિગ્ધરોચિષા ।
કૌશેયેન સમિન્ધાનં સ્કન્ધમૂલાવલમ્બિના ॥ ૮॥

મન્ત્રરત્નાનુસન્ધાનસન્તતસ્ફુરિતાધરમ્ ।
તદર્થતત્વનિધ્યાનસન્નદ્ધપુલકોદ્ગમમ્ ॥ ૯॥

સ્મયમાનમુખામ્ભોજં દયમાનદૃગઞ્ચલમ્ ।
મયિ પ્રસાદપ્રવણં મધુરોદારભાષણમ્ ॥ ૧૦॥

આત્મલાભાત્પરં કિઞ્ચિદન્યન્નાસ્તીતિ નિશ્ચયાત્ ।
અઙ્ગીકર્તુમિવ પ્રાપ્તમકિઞ્ચનમિમં જનમ્ ॥ ૧૧॥

ભવન્તમેવ નીરન્ધ્રં પશ્યન્વશ્યેન ચેતસા ।
મુને! વરવર! સ્વામિન્ મુહુસ્ત્વામેવ કીર્તયન્ ॥ ૧૨॥

ત્વદન્યવિષયસ્પર્શવિમુખૈરખિલેન્દ્રિયૈઃ ।
ભવેયં ભવદુઃખાનામસહ્યાનામનાસ્પદમ્ ॥ ૧૩॥

પરેદ્યુઃ પશ્ચિમે યામે યામિન્યાસ્સમુપસ્થિતે ।
પ્રબુધ્ય શરણં ગત્વા પરાં ગુરુપરમ્પરામ્ ॥ ૧૪॥

ધ્યાત્વા રહસ્યત્રિતયં તત્ત્વયાથાત્મ્યદર્પણમ્ ।
પરવ્યૂહાદિકાન્ પત્યુઃ પ્રકારાન્ પ્રણિધાય ચ ॥ ૧૫॥

તતઃ પ્રત્યુષસિ સ્નાત્વા કૃત્વા પૌર્વાહ્ણિકીઃ ક્રિયાઃ ।
યતીન્દ્રચરણદ્વન્દ્વપ્રવણેનૈવ ચેતસા ॥ ૧૬॥

અથ રઙ્ગનિધિં સમ્યગભિગમ્ય નિજં પ્રભુમ્ ।
શ્રીનિધાનં શનૈસ્તસ્ય શોધયિત્વા પદદ્વયમ્ ॥ ૧૭॥

તતસ્તત્સન્નિધિસ્તમ્ભમૂલભૂતલભૂષણમ્ ।
પ્રાઙ્મુખં સુખમાસીનં પ્રસાદમધુરસ્મિતમ્ ॥ ૧૮॥

ભૃત્યૈઃ પ્રિયહિતૈકાગ્રૈઃ પ્રેમપૂર્વમુપાસિતમ્ ।
તત્પ્રાર્થનાનુસારેણ સંસ્કારાન્ સંવિધાય મે ॥ ૧૯॥

અનુકમ્પાપરીવાહૈરભિષેચનપૂર્વકમ્ ।
દિવ્યં પદદ્વયં દત્ત્વા દીર્ઘં પ્રણમતો મમ ॥ ૨૦॥

સાક્ષાત્ફલૈકલક્ષ્યત્વપ્રતિપત્તિપવિત્રિતમ્ ।
મન્ત્રરત્નં પ્રયચ્છન્તં વન્દે વરવરં મુનિમ્ ॥ ૨૧॥

તતસ્સાર્ધં વિનિર્ગત્ય ભૃત્યૈર્નિત્યાનપાયિભિઃ ।
શ્રીરઙ્ગમઙ્ગલં દ્રષ્ટું પુરુષં ભુજગેશયમ્ ॥ ૨૨॥

મહતિં શ્રીમતિ દ્વારે ગોપુરં ચતુરાનનમ્ ।
પ્રણિપત્ય શનૈરન્તઃ પ્રવિશન્તં ભજામિ તમ્ ॥ ૨૩॥

દેવી ગોદા યતિપતિશઠદ્વેષિણૌ રઙ્ગશ‍ૃઙ્ગં
    સેનાનાથો વિહગવૃષભશ્શ્રીનિધિસ્સિન્ધુકન્યા ।
ભૂમાનિલાગુરુજનવૃતઃ પૂરુષશ્ચેત્યમીષામગ્રે
    નિત્યં વરવરમુનેરઙ્ઘ્રિયુગ્મં પ્રપદ્યે ॥ ૨૪॥

મઙ્ગલાશાસનં કૃત્વા તત્રતત્ર યથોચિતમ્ ।
ધામ્નસ્તસ્માદ્વિનિષ્ક્રમ્ય પ્રવિશ્ય સ્વં નિકેતનમ્ ॥ ૨૫॥

અથ શ્રીશૈલનાથાર્યનામ્નિ શ્રીમતિ મણ્ડપે ।
તદઙ્ઘ્રિપઙ્કજદ્વન્દ્વચ્છાયામધ્યનિવાસિનામ્ ॥ ૨૬॥

તત્ત્વં દિવ્યપ્રબન્ધાનાં સારં સંસારવૈરિણામ્ ।
સરસં સરહસ્યાનાં વ્યાચક્ષાણં નમામિ તમ્ ॥ ૨૭॥

તતઃ સ્વચરણામ્ભોજસ્પર્શસમ્પન્નસૌરભૈઃ ।
પાવનૈરર્થિનસ્તીર્થૈર્ભાવયન્તં ભજામિ તમ્ ॥ ૨૮॥

આરાધ્ય શ્રીનિધિં પશ્ચાદનુયાગં વિધાય ચ ।
પ્રસાદપાત્રં માં કૃત્વા પશ્યન્તં ભાવયામિ તમ્ ॥ ૨૯॥

તતશ્ચેતસ્સમાધાય પુરુષે પુષ્કરેક્ષણે ।
ઉત્તંસિતકરદ્વન્દ્વમુપવિષ્ટમુપહ્વરે ॥ ૩૦॥

અબ્જાસનસ્થમવદાતસુજાતમૂર્તિ-
    મામીલિતાક્ષમનુસંહિતમન્ત્રરત્નમ્ ।
આનમ્રમૌલિભિરુપાસિતમન્તરઙ્ગૈ-
    ર્નિત્યં મુનિં વરવરં નિભૃતો ભજામિ ॥ ૩૧॥

તતશ્શુભાશ્રયે તસ્મિન્નિમગ્નં નિભૃતં મનઃ ।
યતીન્દ્રપ્રવણં કર્તું યતમાનં નમામિ તમ્ ॥ ૩૨॥

ઇતિ પૂર્વદિનચર્યા સમાપ્તા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Purvadinacharya*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*